# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – वास्तुशास्त्रम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – समराङ्गणसूत्रधारः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत ।**

१ अष्टोत्तरशतं ज्येष्ठं मध्यं स्यान्नवतिं करान् ।
जघन्यं सप्ततिकरान् राजवेश्म प्रशस्यते ॥

२ वेदिका च यथोक्ता स्यात् सघण्टा कलशान्विता ।
रेखाशुद्ध्या च कर्तव्या मुण्डाः सर्वे यथायथम् ॥

३ यदृच्छया प्रवृत्तानि भूतानि स्वेन वर्त्मना ।
नियम्यास्मिन् नयति यत् तद् यन्त्रमिति कीर्तितम् ॥

४ स्वयंवाहकमेकं स्यात् सकृत्प्रेर्यं तथापरम् ।
अन्यदन्तरित वाह्यं वाह्यमन्यत् त्वदूरतः ॥

**प्रश्नः २** राजगृहविचारः क्रियताम् ।

**प्रश्नः ३** अश्वशालानिर्माणविचारः क्रियताम् ।

**प्रश्नः ४** द्वारगुणदोषविचारः क्रियताम् ।

**प्रश्नः ५** शिलाविन्यासविधिः विलिख्यताम् ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या ।**

१ पूर्वो नगरभागश्चेद् रम्यः स्यात् प्रियदर्शनः ।
प्रियभार्या मनःस्वास्थ्यं धनं धान्यं च भूपतेः ॥

२ शास्त्रं कर्म प्रथा प्रज्ञा शीलं च क्रिययान्वितम् ।
लक्ष्यलक्षणयुक्तार्थशास्त्रनिष्ठो नरो भवेत् ॥

३ मित्रे स्थानं नरपतेः कार्यं पृथ्वीधरेऽपि वा ।
आर्यम्णे वा विधातव्यं पदे वैवस्वतेऽथवा ॥
४ रक्षोम्बुनाथकीनाशमरुद्दहनदिक्प्लवा ।
मध्यप्लवा च भूर्व्याधिदारिद्र्यमरकावहा ॥

प्रश्नः ७ स्थपतिलक्षणं विलिख्यताम् ।

प्रश्नः ८ अष्टाङ्गलक्षणं विलिख्यताम् ।

प्रश्नः ९ प्रासादद्वारमानविचारः क्रियताम् ।

प्रश्नः १० प्रासादस्य शुभाशुभलक्षणं विलिख्यताम् ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ प्रासादे द्वारभूषा करणीया न वा ?
२ प्रासादे औदुम्बरस्य स्थापना भवति न वा ?
३ रुचकादि कति प्रासादाः सन्ति ?
४ प्रासादे शुकनासिकायाः स्थानं कुत्र भवति ?
५ विमानम् इत्युक्ते किम् ?
६ कपिस्थवृक्षः गृहनिर्माणे प्रयुज्यते न वा ?
७ कस्मिन् कोणे शिलान्यासः भवति ?
८ मार्गवेधे किं फलम् ?
९ समराङ्गणसूत्रधारस्य रचनाकारः कः ?
१० वेद्यः कति प्रकारकाः भवन्ति ?
११ चैत्रमासे गृहनिर्माणस्य किं फलम् ?
१२ नृपगृहस्य विस्तारमानं लिखत ।
१३ गृहस्य मध्यभागे कस्य देवस्य स्थानं भवति ?
१४ पश्चिमदिशः स्वामी कः ग्रहः ?
१५ कोशागारः कस्यां दिशि भवेत् ?

****